# प्रथमप्रकरणम्

# शुद्धाद्वैतसम्प्रदायः

1. सम्प्रदायानां परिचयः ।

2. शुद्धाद्वैतसम्प्रदायः तन्महत्त्वञ्च ।

3. सम्प्रदायस्य वैशिष्ट्यं स्वरूपञ्च।

## 1. सम्प्रदायानां परिचयः

भारतदेशः पुण्यतमो देशः वर्तते। अत्र जीवनस्य महत्त्वम्, उद्देश्यम्, उपयोगिता च सम्यग्रूपेणशास्त्रैः प्रदर्शितम्। शास्त्रेषु अपि दर्शन –शास्त्राणामतीवं महत्त्वं वर्तते। दर्शनानां प्रवृत्तिः दर्शनामुद्देश्यम्, दर्शनानां प्रतिपाद्य–विषया इत्यादिप्रश्नाः सम्यग्रूपेण समाहिता सन्ति। अस्य संसारस्य रहस्यस्य निगूढ़तमस्य प्रपञ्चस्य समाधानपथप्रदर्शकं दर्शनशास्त्र –अस्ति। किं नाम दर्शनम् ? दृश्यते अनेन तद्दर्शनमिति। दर्शनमपि षट्–संख्यकानि सन्ति। तत्र आस्तिकदर्शनमपि षट्संख्यकानि सन्ति। तथैव षट् नास्तिक दर्शनमपि चेति। षट्दर्शनानि वेदमूलकानि सन्ति। तद्यथा –

1. सांख्यदर्शनम् – कपिलाचार्यस्य
2. योगदर्शनम् – महर्षिपतञ्जले
3. वैशेषिकदर्शनम् – महर्षिगौतमस्य
4. न्यायदर्शनम् – महर्षिकणादस्य
5. मीमांसादर्शनम्। (पूर्वमीमांसा) – महर्षि जैमिनेः
6. वेदान्तदर्शनम्। (उत्तरमीमांसा) – वेदव्यासस्य

एतेषां दर्शनानामतीवं महत्त्वं वर्तते। तथापि वेदान्तदर्शनस्य विषये अनेकैराचार्यैः स्वकीयं मार्गः प्रस्थापितः यस्य नाम साम्प्रदाायिकदर्शनम् इति। **को नाम सम्प्रदायः ?**

सं + प्र + दा + घञ। आतो युक् चिण्कृतोः। (7/3/33) गुरुपरम्परागतसदुपदेशः। शिष्टपरम्परावतीर्णोपदेशः। इति भरतः। तत्पर्य्याय । आम्नायः 2 इत्यमरः।[1] यथा माघे ''सम्प्रदायविगमादु–पेयुषीरेष

नाशमविनाशिविग्रहः। स्मर्त्तप्रतिहतस्मृतिः श्रुती–द्र्दत्त इत्यभवदत्रि–गोत्रजः।[2]
गुरुपरम्परागतसदुपदिष्टव्यक्तिसमूहः। यथा ''सम्प्रदायानुरोधेन पौर्व्वापर्य्यानु–सारतः। श्रीभागवतभावार्थदीपिकेयं प्रतन्यते।।'' इति श्रीधरस्वामी तद्भेदाः यथा पद्मपुराणे।

श्रीमन्नारायणो ब्रह्मा नारदो व्यास एव च।
श्रीलमध्वः पद्मनाभो नृहरिर्माध्वस्तथा।।

अक्षोभो जयतीर्थश्च ज्ञानसिन्धुर्महानिधिः।
विद्यानिधिश्च राजेन्द्रो जयधर्म्ममुनिस्तथा।।

पुरुषोत्तमो ब्रह्मण्योव्यासतीर्थमुनिस्तथा।
श्रीमाल्लक्ष्मीपतिः श्रीमान्माधवेन्द्रपुरिस्तथा।।

सम्प्रदायविहीना ये मन्त्रास्ते निष्फला मताः।
अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः।
श्रीमाध्विरुद्रसनका वैष्णवाः क्षितिपावनाः।। [3]

तन्त्रीक्तवैष्णवसम्प्रदाया यथा – श्रीशिव उवाच –

वैखानः सामवदादौ श्रीराधावल्लभी तथा।
गोकुलेशो महेशानि तथा वृन्दावनी भवेत्।।

पा×चरात्र प×चमः स्यात् षष्ठः श्री वीरवैष्णवः।
रामानन्दी हविष्याशी निम्बार्कश्च महेश्वरि।।

ततो भगवतो देवि दश भेदाः प्रकीर्तिताः।
शिखीमुण्डी जटी चैव द्वित्रदण्डी क्रमेण च।।

एकदण्डी महेशानि वीरशवस्तथव च।
सप्त पाशुपताः प्रोक्ता दशधा वैष्णवााः मताः।।

एतेषां वासनं देवि! शृणु यत्नेन शाम्भवि।
वेविष्टि सव्वं संव्याप्य यस्तिष्ठति स वैष्णवः ।।

वैखानसादिदक्षाद्यैर्भूषितः स्मार्तवैष्णवः।
श्रीराधावल्लभं देवि श्रृणु यत्नेन शाम्भवि।।

वैष्णवाचारनिरतो विष्णुतन्त्रैकपारगः।
अन्यचेताः शान्तात्मा विष्णुचिन्तापरायणः।।

श्रीराधावल्लभी देवि गोकुलेशं शृणु प्रिये।
नानाभूषणसम्पन्नो नानासुगन्धिभूषितः।।

गवां कुलं प्रीणयिता केलिकृष्णस्वरूपधृक्।
शरीरमर्थं प्राणांश्च तन्निवेदनकारकम्।।

अन्तः शक्तिपरो देवि वहिवैष्णवरूपधृक्।
गन्धर्वाचारनिरतो लतावेष्टनतत्परः।।

सम्प्रदायो गोकुलेशः सर्व्वसिद्धिकरो भुवि।
वृन्दावनाख्यं देवेशि शृणु यत्नेन सांप्रतम्।।

विगताशः प्रसन्नात्मा विष्णुभक्तपरायणः।
कामिनीस›चपलो वनक्रीडाविनोदधृक्।।

सौगन्धभूषिततनुः स्त्रीध्यानैकपरायणः।
विष्णुसारूष्यतत्वज्ञः प्रोक्तो वृन्दावनी शिवे।।

पाञ्चरात्रो महेणानि तथैव वीरवैष्णवः।

पूर्वमेव महेशानि कीर्तितः परमेश्वरिः।।

राशक्तिरिति विख्याता म शिवः परिकीर्तितः।

तदानन्दी शान्तचित्ती प्रसन्नात्मा विचारधृक्।।

सर्वत्र समरूपश्च रामनन्दी प्रकीर्तितः।।

हविष्याशं महेशानि यथावदवधारय।

पापसंहारणाशक्तो विष्णुभक्तो जितेन्द्रियः।।

यमादिनियमैर्युक्तो भक्ताचारपरायणः।

स्वोपयोगफलाग्राही परकार्य्यपरायणः।।

हविष्यासी महेशानि शिवभक्तिस्वरूपधृक्।

निम्बार्काख्यं सम्प्रदायं शृणु यत्नेन साम्प्रतम्।।

नित्यार्च्चनक्रमासक्तः स्वतन्त्रैकपरायणः।

बाह्यपूजादिनिरतो नान्यभक्तः प्रसन्नधीः।।

आर्य्यपक्षान्वितः स्वच्छः स्वच्छन्दाचारतत्परः।
स्वतन्त्रः स्मार्त्तविद्वेषी निम्बार्को भगवान हरिः।।

अथ भागवतं देवि कथ्यते शृणु सांप्रतम्।
विष्णुभक्तैकनिपुणो विजातात्मा प्रसन्नधीः।।

स्मार्त्तगर्व्वान्वितो देवि तदन्याचारतत्परः।
आर्य्यपक्षान्वितो देवि तथा स्वरूपवेशधृक्।।
शैवद्वेषी तस्य स›ात् पुनः स्नानपरायणः।
केवलं विष्णुतत्वज्ञः प्रोक्तो भागवतः शिवे।।[4]

पूर्वोक्तानुसारेण पञ्चसम्प्रदायाः वैदिकसम्प्रदायाः कथ्यन्ते। तत्र सम्प्रदायानामाचार्यादि भाष्यकाराणां विवरणं प्रस्तूयते ।

## सम्प्रदायानुसारेण भाष्यविवरणम्

| भाष्यकारः | अनुमानित स्थितिकालः | भाष्य नाम | सम्प्रदायः | व्याख्यात सूत्राणि | प्रवर्तितमतम् |
|---|---|---|---|---|---|
| 1.शङ्कराचार्यः | केषाञ्चिनमते वि.पूर्वः, केषाञ्चिनमते षष्ठशती केषाञ्चिनमते नवमशती | शरीरक भाष्यम् | अद्वैत | 555 | |
| 2.रामानुजाचार्यः | वि. 1207 | श्रीभाष्यम् | विशिष्टाद्वैत | 545 | श्रीवैष्णवम् |
| 3.मध्वाचार्यः | वि. 1295 | पूर्वप्रज्ञ | द्वैतमतम् | 562 | वैष्णवम |
| 4.निम्बार्काचार्यः | वि. 1307 | वेदान्त पारिजात | द्वैताद्वैत | 549 | वैष्णवम |
| 5.वल्लभाचार्यः | वि. 1557 | अणुभाष्यम् | शुद्धाद्वैत | 555 | वैष्णवम |
| 6.भाष्कराचार्यः | वि. 1100 | भाष्कर | भेदाभेदमतम् | 547 | |
| 7.श्रीकण्ठाचार्यः | वि. 1327 | शैव | शैव विशिष्टाद्वैत | 545 | शैवमतम् |
| 8.श्रीपतिः | वि. 1457 | श्रीकर | वीरशैव विशिष्टाद्वैत | | शैवमतम् |
| 9.विज्ञानभिक्षुः | वि. 1657 | विज्ञानामृत | अविभाग द्वैतमतम् | 556 | साख्यमतम् |
| 10. बलदेवाचार्यः | वि. 1782 | गोविन्द | अचित्या– भेदाभेदमतम् | 556 | वैष्णवम |
| 11.ब्रह्मानन्द – सरस्वती | | वेदान्तसूत्र मुक्तावली | – | – | – |
| 12.मुक्तानन्द स्वामी | | ब्रह्मसूत्र | – | – | –– |

**1.शङ्कराचार्यः –**

गौणपादाचार्यस्य शिष्यः शिवगुरुनाम्नः पुत्रः महामेधावी आचार्य–शङ्करः कालटीग्रामे प्रादुर्भूतः। वेदान्तदर्शनस्य अपूर्वो विद्वान आदिशंकराचार्यः आसीत। अनेन भगवतः व्यासस्य सूत्राणाम् इति ब्रह्मसूत्रस्य व्याख्यानं शारीरक भाष्यरूपेण कृतम्। अस्य वादः अद्वैतवादः वर्तते। अयमेव प्रथमो सम्प्रदायः। अस्मिन् सिद्धान्ते आम्नः अद्वैततत्वं, ब्रह्मस्वरूपं, मायावादः, ईश्वरस्वरूपं, जीवस्वरूपं, विवर्तवादः, अध्यासः इत्यादीनां विषयाणां कृतविवेचनं अस्याचार्यस्य ग्रन्थेषु प्राप्यते। अस्य नाम शाङ्करसम्प्रदायः वर्तते।

**2.रामानुजाचार्यः –**

दार्शनिकेषु सम्प्रदायाचार्याणामपि विशिष्टामासनम्। तत्र विशिष्टाद्वैतवाद–प्रतिष्ठापको रामानुजाचार्यो वेदान्तसूत्राणां स्वमतप्रतिपादकं भाष्यरचितम्। आचार्याणामेषाम् ईश्वरो॰नन्तज्ञानानन्दस्वरूपः समस्तसृष्टि–स्थितिप्रलयकारकः सगुणो विद्यते। जीवश्च देहेन्द्रियमनोलिक्षणो ज्ञानाश्रयः अणुः सर्वथैवेश्वराश्रितश्चास्ति। द्वयोरेतयोर्जीविश्वरब्रह्मणोर्वासम्बन्धो विशेषण –विशेष्यभावरूपोऽभिहितः। ब्रह्मणो॰नुग्रहादेव च जीवो मोक्षं लभते। यथा अद्वैतवादिनो वेदान्तिनो मोक्षस्थितौ जीवस्य ब्रह्मणि विलयम् अर्थाद् ब्रह्मरूपत्वं मन्यन्ते, न तथेमे रामानुजाचार्याः। इमे हि मुक्तावस्थायां जीवात्मनो ब्रह्मसायुज्यं स्वीकुर्वन्ति।

**3.निम्बार्काचार्यः –**

निम्बार्काचार्यः द्वैतमतस्य आचार्यः अस्ति। अयं आचार्यः जीवमवस्थाभेदतो ब्रह्मणोऽभिन्नं भिन्नमपि च मनुते। अयं दार्शनिकः सम्प्रदायाचार्यः कथयति। यथा भास्करः प्रकाशमयः प्रकाशाश्रयाश्च, तथैव जीवो ज्ञानाश्रयो ज्ञातापि च। जीवः कर्तुत्वे स्वतन्त्रः परन्तु भोगे ब्रह्मणोऽर्था –दीश्वरस्याधीनः। अतश्चेतनत्वेन साम्येऽपि नियमत्वेन स ब्रह्मणो

भेदमुपैति। मोक्षेऽपि जीवस्तदाश्रितः एव नहि पुनस्तल्लीनः। एतन्मतानुसारं ब्रह्म समस्तास्मितारागद्वेषादिशून्यं निःशेषज्ञानबलानिधानश्च विद्यते।

**4.मध्वाचार्यः–**

मध्वसम्प्रदाय–प्रवर्तको द्वैतमतवादप्रतिष्ठापको मध्वाचार्यो ब्रह्म–सूत्रेषु स्वसिद्धान्तप्रतिपादकमणुभाष्यं ततान्। द्वैतवादिनां माध्वनां ब्रह्म केवलं जगतो निमित्तकारणम् उपादानकारणं तु प्रकृतिरेव। तेषां ब्रह्म च ईश्वरो निखिलशक्तिसम्पन्नो विष्णुरेव। एकोऽपि स बहुरूपः समस्तरूपेण च परिपूर्णः। लक्ष्मीश्च माध्वानां परमात्मशक्तिः या हि परमात्मनो·धीना·पि ततो भिन्ना स्वीकृता माध्वैः। माध्वानां जीवश्च जन्ममरणस्वभावः कर्मानुसारं सुखदुःखोपभोगी संसारी च स्वीकृतः। जीवोऽयं विना परमात्मनो·नुकम्पां किमपि कर्त्तुं न प्रभवति। अनुकम्पयैव मुक्तिं लभते तदनुकम्पा च भक्तिसाध्या परमा भक्तिश्च ज्ञानोदयादेव प्रभवति।

**5.वल्लभाचार्यः –**

शुद्धाद्वैतवादप्रतिपादकः पुष्टिमार्ग प्रवर्तकः आचार्यः वल्लभाचार्यः एव। वल्लभाचार्यस्य अनेके शिष्याः सन्ति। ब्रह्म मायया अलिप्तं नितान्तशुद्धश्च मायासम्बन्धराहित्येन चाद्वैतम्। अत एव अमीषां ब्रह्म शुद्धाद्वैतं जगीयते। वाल्लभा ब्रह्मणः सर्वधर्मविशिष्टत्वम् एव च तस्य विरुद्ध –धर्माश्रयत्वं स्वीकुर्वन्ति। ''उभयव्यपदेशात्वहिकुण्डलवत्''[5] इति ब्रह्मसूत्रमुपस्थापयन्तश्चेमे ब्रह्मणि अहिकुण्डलवदुभ्यरूपतां श्रुतिसिद्धां साध्यन्ति। वाल्लभानां जीवस्तिरोहितानन्दादिगुणः स्वमीश्वरवरो ब्रह्मैव। लीलाकैवल्यादेव स च ईश्वरो जीवत्वं प्रतिपद्यते न पुनर्मायोद्वेलितः। वाल्लभा निगुर्णं ब्रह्मैव जगद्रूपेण परिणतं मन्यन्ते। यथा केयूरकटकादिषु परिणतमपि काञ्चनं न विकृतिमभ्युपैति, तथैव जगद्रूपेण परिणमतमपि ब्रह्म न किञ्चिदपि परिणमतिमेतीत्येषां सिद्धान्तः। वल्लभाचार्याणामाचार्यमार्गं एव पुष्टिमार्गः

प्रोच्यते। पुष्टिशब्दञ्चेमे·नुग्रहे प्रयुज्यते, न मुक्तिं प्रति प्रमुखकारणता च अनुग्रहस्यैवेति।

वल्लभाचार्य सम्प्रदाये स्वीक्रियते यत् पद्मपुराणान्तर्गते रुद्र–सम्प्रदायस्य प्रर्वतकः विष्णुस्वामी आसीत्। यथा –

रामानुजं श्रीः स्वीचक्रे मध्वाचार्यं चतुर्मुखः।
श्रीविष्णुस्वामिनं रुद्रो निम्बादित्यं चतुःसनः।।[6]

नाभादास्य भक्तमालानुारेण –

नाम तिलोचन सिष्य सूर ससि सदृस उजागर।
गिरा गंग–उनहारि काव्य–रचना प्रेमाकर।।
आचरज हरिदास अतुलबल आनन्ददायिनी।
तिहि मारया वल्लभ विदित पृथु पधित पराइन।।
नवधाप्रधानसेवा सुहृद मन वच क्रम परिचरणरति।
विष्णुस्वामि सम्प्रदाय दृढ़ ज्ञानदेव गम्भीर मति।।[7]

ज्ञायते शुद्धद्वैतमूलकः पुष्टिमार्गः आसीत्। ततः परं वल्लभाचार्येण अयमेव मार्गः स्वकीयः पुष्टिमार्गः प्रारभत। आचार्यस्य द्वितीयपुत्रः आसीत् विअ्ठलदास अनेन महाभागेन पुष्टिमार्गस्य प्रचारः कृतः। अस्य ग्रन्थस्य नाम 1.निबन्धप्रकाशः 2.विद्वन्नमण्डन 3.श्रृंगाररस मण्डन 4.सुबोधिनी टिप्पण्णी च। अस्य सम्प्रदायस्य विशिष्ट विद्वान आसीत् पुरुषोत्तमजी। अनेन महाभागेन भाष्य प्रकाश नामकी टीका अणुभाष्यप्रकाशः, उपनिषद दीपिका, आवरणभंगः, प्रस्थान रत्नाकर, सुवर्णसूत्रम्, अमृत तरंगिणी टीका (गीताया) षोडशग्रन्थ विवृति, गिरिधर महाराजः गोस्वामी विट्ठलनाथस्य पुत्रः आसीत्। अनेन शुद्धौद्वैतमार्तण्ड नामको ग्रन्थः प्रख्यातः अस्ति।

वल्लभाचार्यस्य दार्शनिकसिद्धान्तः शुद्धाद्वैतः अस्ति। अस्मिन् सिद्धान्ते ब्रह्म–मायया निर्लिप्तमस्ति। नितान्तरूपेण शुद्धं ब्रह्मेव। मायया सम्बन्धरहितम् अद्यैततत्वं एव। न उभयव्यपदेशातत्वहि कुण्डलवत्।[8]

भगवतः महिमा अनवग्राह्या वर्तते। अत एव अणोरणीश्वर अस्ति। सैव महतो महीयान् अपि अस्ति। स भगवान अनेकरूपेषु भूत्वा एक एव तथापि स्वतन्त्रः अपि भक्तपराधीनाऽपि वर्तते। अखिलरसामृतिमूर्तिः निखिल लीलाधान श्रीकृष्णः एव परब्रह्म अस्ति।

वल्लभमते ब्रह्म त्रिप्रकारं भवति। यथा –

1. आधिदैविक परब्रह्म।
2. आध्यात्मिक अक्षरब्रह्म।
3. आधिभौतिक–जगत।

जगत ब्रह्मरूपैव। कार्यकारणभेदयोः अभेदः। कार्यरूपं जगत कारणरूप ब्रह्मैव। वल्लभाचार्यस्य मते ब्रह्म एव स्वभावतः जगतकर्ता वर्तते। यदा दिच्छा भवति संसारस्य संहारः लयं च करोति। अंततः प्रलयः अपि भगवतः लीलायाः एकरूपं वर्तते। भगवतः महिमानं अर्तक्यं अस्ति। अनेन प्रकारेण शुद्धाद्वैतसम्प्रदाये लीलायां रहस्यं वल्लभाचार्येण सुबोधिनी टीकायां लिखितम् यत् –

''लीला नाम विलासेच्छा कार्यव्यतिरेकेण कृतिमात्रम्। न तया कृत्वा बहिः कार्यं जायते, जनितमपि कार्यं नाभिप्रेतम्, नापि कर्तरि प्रयासं जनयति, किन्तु अन्तःकरणे पूर्णे आनन्दस्तदुल्लासेन कार्यजननसदृशी क्रिया विद्यते।''[९]

वल्लभाचार्यस्य सिद्धान्ते श्रीमद्भागवतस्य भगवतगीतायाश्च विशेषः प्रभावः दृश्यते। यतोहि ब्रह्मणः रूपत्रयस्य कल्पना गीतायाः अष्टं, पञ्चदश अध्यायानुसारेण अस्ति। जीवविषयक धारणा अस्मिन् सम्प्रदाये इयमस्ति। यत् जीवः नित्यः वर्तते। यथा स्फुल्लिंः भवति तथैव जीवः ईश्वरात्, निर्गच्छति। अनेन कारणेन जीवस्य नित्यतायां, न्यूनतां व जायते। जीवः त्रिप्रकारकः भवति। 1.शुद्धः 2.मुक्तः 3.संसारी च।

जगतविषये वल्लभाचार्यः अविकृत परिणामवादं स्वीकरोति। कनक–कामधेनु–कल्पवृक्ष–चिन्तमणिः इत्यादीनां सदृशानां निर्गुण सच्चिदानन्दात्मकं ब्रह्म एव अविकृतभावेन जगद्रूपेण भवति।

भगवतः प्राप्ते सहजोपायः भक्तिः एव भगवतः त्रिविधरूपवत मार्गः अपि त्रयः वर्तते।

1. आधिभौतिककर्ममार्गः।
2. ज्ञानमार्गः आध्यात्मिकः वर्तते।
3. आचार्यमार्गः अर्ाित् पुष्टिमार्गः कथ्यते इति।

वल्लभाचार्यमते भक्तिः द्विविधा भवति। यथा –

1. मर्यादाभक्तिः।
2. पुष्टिभक्तिः।

मर्यादाभक्तिद्वारा सायुज्य प्राप्तिः भवति।

पुष्टिभक्तिद्वारा अभेदबोधनस्य प्रधानतया सिद्धिः प्राप्यते। पुष्टिः एव श्रीमद्भागवतस्य प्रधानरहस्यं वर्तते।

एवं प्रकारेण वल्लभाचार्यस्य दर्शन एवं सिद्धान्तः अस्ति।

## सन्दर्भिका


1. अमरः – 3/2/7
2. माघे – 14/49
3. पद्मपुराण
4. शिवस›मतन्त्रे .1 ,खण्डे, 8 पटलः
5. ब्रह्मसूत्र – 3/2/27
6. पद्मपुराणे
7. भक्तमाले
8. ब्रह्मसूत्रे – 3/2/2 अणु.
9. सुबोधिनी टीकायां, तृतीय स्कन्धे

## 2. शुद्धाद्वैतसम्प्रदायः तन्महत्त्वञ्च

अस्मिन् सम्प्रदाये यद् वैशिष्ट्यं वर्तते तस्य महत्वं च अन्यतमम् वर्तते। अत्र ब्रह्मविचारः जीवरूपविचारः, प्रकृतिविचारः, प्रमाणविचारः जगतः वैशिष्ट्यं भक्तिभेदादिनाम् विचारः अत्र कृतः। अन्येभ्यः सम्प्रदायेभ्यः सम्प्रति अस्य सम्प्रदायस्य अतीव महत्वम् दरीदृश्यते।

अयं सम्प्रदायः सम्प्रति विश्वस्य अनेकेषु देशेषु प्रसरतिः अस्ति। अस्य सम्प्रदायस्य सप्तग्रहणी सन्ति। तद् गृहाणां अधिरोधः विविधेषु स्थलेषु अस्य सम्प्रदायस्य प्रचारः कृतः सम्प्रति अस्य महत्वं दरीदृश्यते। वस्तुतस्तु वल्लभाचार्येण मतानुसारेण त्रीणि एव तत्वानि सन्ति। तद्यथा –

1.ब्रह्म 2.जीवः 3.जगतः

**सिद्धान्तः –**

भवतः कृष्णस्य अनुग्रहः एव पुष्टिः क्रियते। अनेने अनुग्रहणेन या भक्तिः उत्पद्यते सा पुष्टिभक्तिः कथ्यते। अत्र वेदान्तानुसारेण भिन्न–भिन्न लोकेषु जीवाः गच्छन्ति। अयमेव पुष्टिजीवः भगवतानुग्रहेणनित्य लीलायां प्रवेशाधिकारिणः भवन्ति।

प्रेमलक्षणाभक्तिः अस्य मनोरथस्य पूर्तिः करोति। अनेन कारणेन अनुग्रह मार्गेण आधारभूतसिद्धान्तः वर्तते। यदोक्तं –

सर्वदा सर्वभावेन भजनीयो व्रजाधीपः।
तस्मात् सर्वात्मना नित्यं श्रीकृष्णः शरणं मम्।। इति दृष्ट्या कृष्णस्तु भगवान् स्वयमाधारेण कृष्ण एव सर्वदासेव्याः स्मरणीयः कीर्तनीयश्च।

आचार्येण षोडश ग्रन्थाः रचिताः सन्ति। यथा –

| क्रम | ग्रन्थस्यनाम | क्रम | ग्रन्थस्यनाम |
|---|---|---|---|
| 1 | यमुनाष्टकम् | 9 | सिद्धान्तरहस्यम् |
| 2 | बालबोधः | 10 | नवरत्नस्त्रोत |
| 3 | सिद्धान्तमुक्तावली | 11 | अन्तःकरणप्रबोध |
| 4 | पुष्टिप्रवाहमर्यादाभेदः | 12 | विवेकधैर्याश्रयः |
| 5 | श्रीकृष्णाश्रयः | 13 | पञ्चपद्यानि |
| 6 | चतुःश्लोकी | 14 | संन्यासनिर्णयः |
| 7 | भक्तिवर्धिनी | 15 | निरोधलक्षण |
| 8 | जलभेदः | 16 | सेवाफल |

तत्र भवन्तः भगवन्तः अन्येऽपि ग्रन्थाः तेषु –

1. शुद्धाद्वैतप्रतिपादकः दार्शनिकग्रन्थः –अणुभाष्यम्।
2. तत्वार्थदीपनिबन्धः।
3. पुरुषोत्तमसहस्रनाम।
4. पत्रावलम्बनम्।
5. पञ्चश्लोकी।
6. पूर्वमीमांसाभाष्यम्।
7. सुबोधिनी टीका (श्रीमद्भागवतमहापुराणेपरि½
8. मधुराष्टकम्।

एतेषु ग्रन्थेषु शुद्धाद्वैतप्रतिपादकः प्रधानग्रन्थः दार्शनिक ग्रन्थश्च अणुभाष्यं वर्तते। इदं भाष्यम् उत्तरमीमांसाः ब्रह्मसूत्रस्य भाष्यं वर्तते। एतदिरिक्तं तत्वार्थदीप निबन्धः पुरुषोत्तम सहस्रनाम पत्रावलम्बनम् पञ्चश्लोकीय पूर्वमीमांसाभाष्यम् सुबोधिनीटीका च लिखितः।

**आचार्यवर्यस्य कुलपरम्परा :–**

वैष्णवसम्प्रदायेषु श्रीमद्वल्लभाचार्यः वैष्णवेषु अन्तिमो आचार्यः। अस्य कुलपरम्पराविषये प्राप्यते यत् अयं तु भारद्वाज कुलोत्पन्नः आसीत्। तत्रापि तैत्तरीयशाखायाम् यजुर्वेदः वेदरूपं वर्तते। तथा च तैलंगब्राह्मणः आसीत्। तैलंग क्षेत्रे कांकरवा इति ग्रामः आसीत् तत्रैव पुष्टिमार्गीय कल्पतरोः वल्लभाचार्यस्य जन्मः अभवत्। तस्य वंश वृक्षरूपेण परम्परा प्राप्यते। अस्य जन्म चंपारण्यक्षेत्रे संवत 1535 तमे वर्षे चैत्रमासस्य कृष्णपक्षस्य एकादश्यां तिथौ जन्मः अभवत्।

श्रीवल्लभचरित्रमहाकाव्ये प्राप्यते यत् वल्लभपूर्वजाः आन्ध्रतैलंगविप्राः आसन्। यथा –

गोविन्दाचार्यस्त्पुत्रात् वल्लभाद् दीक्षिताह्वयात्।
नारायणसमुत्पन्नो ज्ञानरत्नं गुणी सुधीः।।[1]

सेवानुरागिणैः एतैः वल्लभदीक्षितात्मजैः यज्ञनारायणभट्टैः विधिना कामनारहिताः द्वात्रिंशत सोमयागान् मुदा चक्रुः। षडैश्चर्यसंपन्नैः नारायणैः वल्लभउीक्षितात्मजं यज्ञकर्मप्रसन्नत्वात् वरं दत्तं यत् –

सोमयागशतं पूर्णं यदा स्यात् त्वत्कुलेऽमले।
श्रीकृष्णो भगवान् तुष्टोऽवतरिष्यति सर्वदः।।[2]

सोमयागशतं पूर्णं कदा भविष्यतीति अविचार्य तेषां हृदये असाधारणवरं प्राप्य प्रसन्नता आसीत्। अनन्तरं यज्ञनारायणात्मजैः गंगाधरैः अष्टाविंशतिसंख्यकाः सोमयज्ञाः कृताः। गड्.गाधरात्मजैः त्रिंशत् सोमयज्ञाः कृताः।

यज्ञकर्मफलप्रसादात् पुत्रवल्लभस्य जन्म तेषां कुले अभवत्। गणपत्यात्मजः पञ्च सोमयागान् अकरोत्। पुनः फलस्वरूपेण वल्लभगृहे

लक्ष्मणस्य जन्म अभवत्। लक्ष्मणेन पुनः पञ्च सोमयज्ञाः पुत्रप्राप्तये कृताः। अतः तेषां कुले शतं सोमयज्ञाः पूर्णां अभवत्। समये लक्ष्मणगृहे

इल्लमाभार्यया रामकृष्णः पुत्रः तथा सरस्वती एवं सुभद्रा पुत्र्योः जन्मः अभवत्।

शुद्धाद्वैतदर्शनम् आदिशंकराचार्यस्य अद्वैतवादात् भिन्नं वर्तते। केवलाद्वैत यत्र मायां शवलीतं ब्रह्म जगताकराणम् मन्यन्ते अपि च सकलसंसारं मिथ्या स्वीक्रियते। किन्तु शुद्धाद्वैते मायासम्बन्धरहितम् नितान्तं शुद्धं ब्रह्म एव जगतकारणमस्ति। वल्लभाचार्येण एव प्रमाणं मन्यते।

वल्लभाचार्यस्य जन्मः (1479 –1531) भक्तिकालीन सगुणधारायः आधारस्तम्भरूपेण अभूत। अस्याचार्यस्य प्रादुर्भावः विक्रम संवत 1535 वैशाख कृष्ण एकादस्यां दक्षिणभारतस्य कांकरवाड ग्रामे तैलंगब्राह्मण परिवारे अभूत्। अस्य पितुः नाम लक्ष्मणभट्टः, मातुः नाम इल्बा आसीत्। सम्प्रति अयं ग्रामः छत्तीसगढ़ राजस्य रायपुरनगरनिकटे चंपारण्यरूपेण प्रख्यातः वर्तते।

## श्रीमद्वल्लभाचार्यस्य कुलपरम्परा :–

## अखिलभमण्डलाचार्यवर्य पुष्टिमार्गीयकल्पतरोः श्रीमद्वल्लभाचार्यस्य वंशवृक्षः

| क्रमः | आचार्यः | सोमयज्ञस्य संख्या |
|---|---|---|
| 1 | श्री गोविन्दाचार्य | .. |
| 2 | श्री वल्लभदीक्षितः | .. |
| 3 | श्री यज्ञनारायण भट्टः | 32 |
| 4 | श्री ग›ाधर भट्टः | 28 |
| 5 | श्री गणपति भट्टः | 30 |
| 6 | श्रीवल्लभ भट्टः | 5 |
| 7 | श्री लक्ष्मण भट्टः | 5 |

वल्लभाचार्येण प्रस्थानचतुष्टयं स्वीकृतम्। तत्र श्रीमद्भागवतस्य महत्वं अत्यन्तं श्रेयस्करं वरिष्ठं च कथ्यते। तेनोक्तं यत् श्रीमद्भागवतोक्त भक्तिस्वरूपं स्वीकृतम्। यतो हि सर्वेषां जनानां कृते नवधा भक्तिः अतीव श्रेष्ठः वर्तते। यथा –

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यात्मकनिवेदनम्।।[3]

वल्लभोक्त जीवनसाफल्याय श्रीमद्भागवते यानि भक्तिस्वरूपाणि कथितानि तेषां स्वरूपं अत्र उपस्थाप्यते –

**1.श्रवणम् –**

गुरुमुखग›प्रवहितविद्याश्रवणम्। अत्र ग्रहणपूर्वकं श्रूयते तत् श्रवणमिति। वक्तुं सर्वेऽपि इच्छन्ति न कोऽपि श्रोतुमिति दारुण+ कलिः। अतः नारदः अब्रवीत् 'श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः। इति। [4]

साम्प्रते ये विद्यार्थिनः शिक्षकवचनं न श्रुणवन्ति वा श्रुत्वा मननं न कुर्वन्ति ते फलागमसमये –

आरभ्यत्रप्राप्त्याशनियतफलागमाः। (पञ्चावस्थां [5]

दुखिःताः भवन्ति किन्तु यै श्रुतं शुद्धं स्पष्टं अर्थबोधसहितं ते सुमधुरगुणान् प्राप्नुवन्ति फलभेदः। उकतम् हरिदासैः पद्मपुराणे एतादृशमेव यथा –

श्रवणस्य विभेदेन फलभेदोऽत्र संस्थितः।
श्रवणं तु कुतः सर्वैर्न तथा मननं कृतम्।।[6] अतः सर्वैः श्रवणगुणाः ग्राह्यः।

**2.कीर्तनम् :—**

कीर्तनमित्यावर्तनम्। पठितानांशानां पुनर्पुरावर्तनं कीर्तनम्। श्रवणानन्तरं यदि कीर्तनं न क्रियते चेत् विस्मृतिः निश्चितः। ''कीर्तने ते कुमाराः''[7] इत्युक्त्वा व्यासेनापि दर्शितं यत् ये ''पञ्चहायतसंयुक्ताः पूर्वेषामपि पूर्वजा।''[8] सन्ति कीर्तनरताः। यतो हि अत्र भगवदगुणानुवादगानं कीर्तनमिति। पद्मावत्याः उपस्थापित्यामपि उदयन् वासवदत्तायाः कीर्तनमकरोदिति दृश्यते यथा — पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः। वासवदत्ताबद्धं न तु तावन्मे मनोहरति।[9] ततः सः तां प्राप्नोत्यपि। कीर्तनगुणः ग्राह्यः येन ध्येयं सर्वेषु क्षेत्रेषु दृढ़ भवेत्।

**3.स्मरणम् :—**

आत्मविश्वासो नाम स्मरणम्। स्मरणं नाम दिवारात्रौ एकस्यैव ध्येयेस्य स्मृतिः। स्मृत्यां यस्यकस्यापि स्मरणं कीर्तनेन वर्धते। कालिदासस्य यक्षस्य कृते पुनः प्रियतमाप्राप्तिरेव लक्ष्यम् अतः सर्वासु अवस्थासु तस्याः एव स्मरणमकरोत्। —कण्ठाश्लेशषप्रणयिनि जने किं पुनर्दूरसंस्थे। [10] विश्वासौ दृढ़ भवत्यतः स्मरणं कर्तव्यम्।

**4.पादसेवनम् :—**

विद्यादानसेवापरायणत्वं पादसेवनम्। सा सेवा त्रिधा —तनुजा, वित्तजा— एवं मानसी। यथा अम्बरीषः प्रकारत्रयेण सेवां कुर्वन् भगवतः प्रीतिं प्राप्तवानृ। तदा भगवान् अवदत् —'अहं भक्तः पराधीनो।'[11] युगेऽस्मिन् विद्यादानसेवायामपि प्रकारत्रयेण सेवा अनिवार्यां इति धार्मिकविचारः। ज्ञानतृषापार्थिभ्यः विद्यादानं पादसेवनम् एव इ तिमे मतिः।

**5.अर्चनम् :—**

गुरुग्रनथविद्यार्थिषु भगवद्भावः अर्चनम्। कार्यक्षेत्रे यदि एतेषु भगवद्भावः अस्ति चेत् तदर्चनमेव। विद्यार्थिषु किमर्थं भगवद्भावः सति

स्मर्तव्यं भवभूतिवचनम् यथा – गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।[12] –

**6.वन्दनम् :–**

वन्दनं नाम कर्तव्यपरिपालनम्। न केवलं हस्ताभ्यां वन्दनीयम् अपि तु यदस्माकं कर्तव्यमस्ति तस्य आजन्मपरिपालनम्। कुर्वन्ति ते वन्दनं शठाः अपि येषां हृदये हलाहलम्। अतः न केवलं दर्शनात्मकं वन्दनं कृत्वा कर्तव्यपरिपालनशीलाः भवेम्। तदा एव वन्दनं सार्थकमिति मे मतिः।

**7.दास्यम् :–**

दास्यं नाम निरभिमानत्वम्। दासाः भवन्ति ते कलिजीवाः किल मोदकं प्राप्तुम्। अपि उञ्चपदवीं प्राप्य अहंकारविमुखत्वं जीवने इति दास्यभावः अप्यासीत्। किन्तु अहंकारत्वात् प्रभुवियोगः यथा –

तासां तत् सौभगमिदं वीक्ष्णमाणं च केशवः।
प्रशमाय प्रसादाय तत्रैवान्त्रधीयतं [13]

**8.सख्यम् :–**

सख्यं नाम विद्याकार्यमित्रगुरुषु सर्वातमभावः। अयि! विचारयन्तु मित्राणि व्यवहारेण जायन्ते इति केनचिदुक्तम्। अतः व्यवहारे कृष्णवचनं यत् ''ममैवांशो जीवलोके जीवभूतः सनातनः।''[14] इति विचार्य आत्मदृष्टया कपटलोभयोः त्यागं कृत्वा व्यवहर्तव्यमित्युपदेशः।

**9.आत्मनिवेदनम् :–**

आत्मनिवेदनं नाम परापकाराय जीवनसमपर्णम्। अत्र परापकारे दर्पशून्यं जीवनमनिवार्यम्। हे जीवोद्धारक! म्या श्रवणात् आत्मनिवेदनं यावत् संपूर्णऽस्मिन् जीवनक्षेत्रे नवधाभक्तिनियमस्य पालनं कृतमधुना ''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।[15] इति विचार्य आत्मनिवेदनं करोमि। एतादृशः हृदयस्य अलौकिकभावः जीवनसमर्पणमिति कथ्यते। तादृशः अलौकिकभावः अनेकजन्मकृतपुण्यकर्मभिराविर्भवतीति मे मतिः।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यात्मकनिवेदनम्।। [16]

तथा च

सच्चिदानन्दरूपाय विश्वोत्पत्यादि हेतवे।
तापत्रयविनाशाय श्रीकृष्णाय वयं नमः।। [17]

सत्यं नाम पारदर्शकत्वम्। जीवने सत्यस्य पालनं भवेदित्यनिवार्यम्। उक्त्वा कलिदोषान् नारदः रुदनमकरोदिति पद्मपुराणे दृश्यते। यथा –''सत्यं नास्ति तपः शौचं दया दानं न विद्यते।''[18] ''सत्येन हीनाः।''[19] इति श्रुत्वा ज्ञानं भवति यत् तेषु कलिप्रभावो वर्धते।

अतः ''सत्यं ज्ञानमनन्तं ब्रह्म।'' इति चिन्तयित्वा ब्रह्मजिज्ञासार्थं प्रयत्नः विधेयः। चैतन्यं नाम प्रवृत्तियुक्तं जीवनम्। बाह्यचैतन्यं निरर्थकमिति मे मतिः। न केवलं पशुवत् आहारनिद्राभयमैथुनं च कृत्वा प्रवृत्तिः विधेया अपि तु ''अथातौ ब्रह्मजिज्ञासा''[20] इति विचार्य ब्राह्यचैतन्यात् भिननमेवं शुद्धं स्पष्टं मधुरं लोकोपराकरं चैतन्ययुक्तं जीवनं जीवनीयम्। ''आनन्दमयोऽयासात्''[21] इति बादरायणवाचं श्रुत्वा जीवनस्य प्रत्येकक्षेत्रे निरन्तराभ्यासः विधेयः। यदा अभ्यासे अपि असमर्थः चेत् भगवदर्थं कर्मं कुर्वन् सिद्धिरेव आनन्दप्राप्तिः। यथा–

अभ्यासेप्यऽप्समर्थोऽसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन्निद्धिमवाप्यसि।। [22]

भगवतः कार्यं विश्वस्य निर्माणं, स्थितिः एव लयः। निर्माणे मोहः त्याज्यः, स्थितिः अर्थात् पालनं पोषणं सर्वासु परिस्थितिषु समानत्वमावश्यकम् यथा ''सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।''[23]

भगवतः मुख्यकार्यं विश्वोत्पत्यादि तथैव धनार्जनार्थं वयमपि एकं कार्यं स्वादरपूत्यर्थं कुर्मः नैतत् पर्याप्तम् अपि च भगवतः लोकोपकारकं कार्यं यत् तापत्रयविनाशः तादृशं लोकोपकारकं कार्यस्माकं किं स्यादिति विचार्य व्यवहर्तव्यम्।

अन्ते ''श्रीकृष्णाय वयं नम्'' इति दर्शयति यत् ये लोकानुपकुर्वन्ति ते जयन्ति वा तादृशाय जीवाः नमन्ति। पद्यांशोह्येषः सूचयति यत् तादृशं जीवनीसं येनम रणानन्तरमपि लोके अस्माकं स्मृतिः न गच्छेत। एतदेव अस्माकं कृते ''श्रीमनुष्याय नमः।'' इति जीवनसाफल्यम्। एवमत्रैव श्रीकृष्णवचनं – ''ममैवांशो जीवलोके जीवभूतः सनातनः।''[24] सिद्धं भवेदिति मे मतिः।

# सन्दर्भ–सूची


1. श्रीवल्लभचरितमहाकाव्यम् –1/24/7
2. श्रीवल्लभचरितमहाकाव्यम –1/53
3. श्रीमद्भागवत–7/5/23
4. पदम.–उत्तरखण्डे भागवतमाहात्म्ये –6/76
5. दशरूपके–1/19
6. पदम–उत्तरखण्डे–5/71
7. पद्मपुराणे उत्तरखण्डे–6/86
8. पद्मपुराणे– उत्तरखण्डे–2/46
9. स्वप्नवासवदत्ते – 4/4
10. मेघदूते–पू.मे.–3 स्मरणेन लक्ष्यप्राप्ते
11. श्रीमदभागवतमहापुराणे – 9/4/63
12. उत्तररामचरिते – 4/11
13. श्रीमद्भागवतमहापुराणे – 10/29/48
14. श्रीमदभागवते –15/7
15. श्रीमदभागवते –2/47
16. श्रीमद्भागवत–7/5/23
17. पद्मपुराणे उत्तरखण्डे–महात्म्ये 1/1
18. पद्मपुराणे उत्तरखण्डे–महात्म्ये 1/31
19. पद्मपुराणे उत्तरखण्डे–महात्म्ये 4/12

20. ब्रह्मसूत्रम् –1/1/1

21. ब्रह्मसूत्रम्–1/1/12

22. श्रीमद्भगवतगीतायाम्–12/10

23. श्रीमद्भगवतगीतायाम्–2/38

24. श्रीमद्भगवतगीतायाम्–15/7

# 3. सम्प्रदायस्य वैशिष्ट्यं स्वरूपञ्च।

पद्मपुराणानुसारेण वल्लभाचार्यस्य प्रवर्तकः विष्णुस्वामी आसीत। यथा –

रामनुजं श्रीः स्वीचक्रे मध्वाचार्य चतुर्मुखः।
श्रीविष्णुस्वामिनं रुद्रो निम्बादित्यं चतुःसनः।।[1]

नाभादासस्य भक्तमालनामके ग्रन्थे –

नाम तिलोचन सिष्य सूर ससि सुदस उजागर।
गिरा गंग–उनहारि काव्य–रचना प्रेमाकर।।
आचारज हरिदास अतुलबल आनन्द दाइन।
तिहि मारग वल्लभ विदित पृथु पाधित पराइन।।
नवधा प्रधानसेवा सुहृद मन वच क्रम परिचरणरति।
विष्णुस्वामि–सम्प्रदाय दृढ़ ज्ञानदेव गम्भीर मति।।[2]

उद्धृतमस्ति यत् विष्णुस्वामिनः सम्प्रदाये ज्ञानदेवः, नामदेवः, त्रिलोचनः, इत्यादयाः सन्ताः अभवन्। तथैव वल्लभाचार्येण अस्य मार्गस्यैव स्वीकृतस्य स्वस्य शुद्धद्वैतमूलकः पुष्टिमार्गः स्वीकृतः।

विष्णुस्वामिनः समयः 1295–1296 ई.पू. आसीत्। रसेश्वरदर्शनं मध्वाचार्येण एकः श्लोकः लिखितः । सकलाचार्यमतसंग्रहः नामके ग्रन्थे श्रीनिवासस्य कथनानुसारेण अयमेव शुद्धाद्वैतस्य प्रतिपादकः आसीत। अस्य सम्प्रदायस्य मूलाचार्यः महाप्रभु वल्लभाचार्यः आसीत। यस्य जन्मः 1479 शतके अभूत्। अस्मिन् सम्प्रदाये अनेके आचार्याः अभवन्। यस्य नाम –विट्ठलनाथः, कृष्णचन्द्रः, श्रीगिरिधराचार्यः, हरिदासाचार्यः, व्रजनाथभट्टः, लालूभट्टः, कृष्णभट्टः इत्यादयः आसन्।

**सम्प्रदायस्य वैशिष्ट्यम् –**

वल्लभसम्प्रदाये अनेकानि वैशिष्टानि सन्ति। तद्यथा –

1. वल्लभसिद्धान्तः
2. वल्लभमते ब्रह्मस्वरूपम्।
3. वल्लभमते जीवस्वरूपम्।
4. वल्लभमते जगत् स्वरूपम्।
5. पुष्टिमार्गः।
6. प्रस्थानचतुष्टयी।

**1.वल्लभसिद्धान्तः –**

वल्लभाचार्यस्य मार्गः पुष्टिमार्गः कथ्यते। अस्मिन् मते मायावादरहितं अद्वैतं मतमेव। यस्य नाम शुद्धाद्वैतः। अस्य शुद्धाद्वैतस्य अपि बीजं वेदेषु उपलभ्यते। यथा एकं शतं विप्राः बहुधा वदन्ति।

शुद्धाद्वैतपदे ज्ञेयः समासः कर्मधारयः।
अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधः।।
मायासम्बन्धरहितं शुद्धमित्युच्यते।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम्।।[3]

ब्रह्मणः उभयरूपतः अस्मिन् सम्प्रदाये प्रदर्शितः। यथा –

उभयव्यदेशात् त्वहिकुण्डलवत्।[4]

परं अणु पुष्टिमार्गसर्मथकमतमिदं भक्तिः एव मोक्षसाधनम्। कृष्णः एव परमेश्वरः। अखिलं जगत इह भगवल्लीलामयं जगदादिदमस्ति इति वल्लभाचार्यस्य सिद्धान्तः। अत्र भगवद् कृपा एव पुष्टिमार्गस्य अधिकारी भवति।

**2.वल्लभमते ब्रह्मस्वरूपम्–**

शुद्धाद्वैतसम्प्रदाये ब्रह्मणः सर्वधर्म विशिष्टमङ्गीकृतम् ब्रह्म शदपि अनेकरूपं अद्वितीयत्वं न जहति। स्वतन्त्रं शदपि भक्ताधीनं वर्तते। अत्र भगवल्लीलामयं इदं जगत् वर्तते इति निगदितम्। लीलाशब्दस्य अर्थः

सुबोधिनी टीकायां तेन लिखितं यत् – '' लीला नाम विलासेच्छा, कार्य–व्यतिरेकेण कृतिमात्रम्। न तया कृत्या बहिः कार्यं जायते।, जनितमपि कार्यं नाभिप्रेतम्, नापि कर्तरि प्रयासं जनयति। किन्तु अन्तःकरणे पूर्णे आनन्दस्तदुल्लासेन कार्यजननसदृशी क्रिया काचिदुत्पद्यते।[5]

ब्रह्मणः स्वरूपं त्रैविध्यमस्ति। तद्यथा –

1.आधिदैविकम् परब्रह्म

2.आध्यात्मिकम् अक्षरं ब्रह्म

3.आधिभौतिकं जगदात्मकम् ब्रह्म

अत्र इदं जगतमपि ब्रह्मस्वरूपमेव कारणकार्ययोः अभेदात् आविर्भाव दशायां ब्रह्मणः जगत् रूपत्वां तिरोभावदशायां ब्रह्मरूपत्वमिति।

तेनोक्तम् – ' तेन ज्ञानमार्गिणां न पुरुषोत्तमप्राप्तिरिति सिद्धम्। यस्यान्तः स्थानींत्वेन परस्य लक्षणमुक्तम्। तच्च भक्त्यादिप्रसंगे श्रीगोकुलेश्वरे स्पष्टमुच्यते। एतदयुक्ततत्वमेवानुगृह्याति।[6]

**3. वल्लभमते जीवस्वरूपम् –**

वल्लभाचार्यस्यमेत जीवः स्वयम् ईश्वरः एव। अयं जीवः तिरोहितानन्दादिगुणाः स्वयम् ईश्वरः एव। स केवलं लीलाविलासमात्रेण यदृच्छया क्रियते। यथा – '' पराभिध्यानार्त्तु '[7]

वल्लभसम्प्रदाये जीवस्य अणुत्वं स्वीक्रियते। प्रमेय रत्नार्णवे अस्य जीवस्य त्रिविधं रूपं निगदितम् – शुद्धः, मुक्तः तथा संसारी चेति। मुक्तजीवस्य सच्चिदानन्दाद् नितान्तः अभेदः एव भवति। शुद्धाद्वैतमार्तण्डे अस्य विवेचनं बृहद्रूपेण प्राप्यते।

**4. वल्लभमते जगत् स्वरूपम्–**

आचार्येण ''जगत् विषये निगदितं यत् अविकृतपरिणामवादः एव अभ्युपगमः।'' कनकं कामधेनुः, कल्पवृक्षः चिन्तामणिः इत्यादीनां समानमेव

निगुर्णं सच्चिदानन्दात्मकं ब्रह्ममेव अविकृतभावेन जगद्रूपेण भवति। यथा –कुण्डलादिरूपेण परिणितरूपेण स्वर्णः एव सर्वत्र विद्यते तथैव जगतरूपेण परिणितरूपेण ब्रह्मणि न को·पि विकारः भवति। वल्लभमते जगतः मूलोत्पतितः न विनाशः भवति तस्मिन् मते आविर्भावः तिरोभावः भवति। यथा – अनुभवविषयत्वयोग्यता आविर्भावः तदविषयत्वयोग्यतो तिरोभावः।'' [8]

**5.पुष्टिमार्गः–**

वल्लभाचार्यमते शुद्धाद्वैतसिद्धान्तस्य अपरनाम पुष्टिमार्गः कथ्यते। भगवद् प्राप्ते सहजोपायः केवलं भक्तिः एव। ''पोषणं तदनुग्रहः। पुष्टिशब्दस्य अर्थः अनुग्रहः भवन्ति। अस्मिन् मते मन्यन्ते यदस्ति मर्यादामार्गः पुष्टिमार्गयोः नितरां भेदः। पुष्टिमार्गो·नुभर्वकसाध्यः प्रमाणमार्गद्विलक्षणः इति।[9]

**6.प्रस्थानचतुष्टयी –**

सर्वैः पूर्वाचार्यैः शंकराचार्येण, रामानुजाचार्येण मध्वाचार्येण, निम्बाकाचार्येण च प्रस्थानत्रयं स्वीकृतम्। प्रस्थानत्रये उपनिषदः गीताब्रह्म सूत्रं च स्वीक्रियते। किन्तु वल्लभाचार्येण प्रस्थानचतुष्टयं स्वीकृतम्। अनेन श्रीमद्भागवतं चतुर्थरूपेण कथितम्। व्यासस्य समाधिभाषा स्वीकृता प्रस्थान चतुष्टये पूर्वोक्तग्रन्थाः आधरभूताः। वल्लभसम्प्रदाये भागवतमहापुराणस्य अतिशया प्रतिष्ठा वर्तते। अणुभाष्यमपि अतिशेते सुबोधिनी इति। यदोक्तं हरिरायेण –

नाश्रितो वल्लभाधीशो न च दृष्टा सुबोधिनी।
नाराधि राधिकानाथो वृथा तज्जन्म भूतले।।[10]

**सम्प्रदायस्य स्वरूपम् –**

अखिलब्रह्माण्डे ईश्वरविषयिकी चर्चा प्रायेण सर्वेषु धर्मेषु सर्वेषु सम्प्रदायेषु च भवति। अनादिकालतः भारतदेशे इयं चर्चा महर्षिभिः

स्वीकीयेषु ग्रन्थेषु विविधरूपेण निगदिता। शास्त्रेषु दर्शनशास्त्रम् अस्मिन् विषये महत्वपूर्णम् अन्यतमम् च वर्तते। यतोहि जगतः उद्देश्यं प्रयोजनम् उपयोगिता च अस्मिन्नेव शास्त्रे विहिता दृश्यते अनेन इति तद् दर्शनम् इति।

अस्माकं देशे षड् दर्शनानि कानि सन्ति, तत्रापि वेदान्तदर्शनं विषयेऽस्मिन् उपयुक्तमस्ति। उत्तरमीमांसायाः अनेकैः आचार्यैः स्वलेखनी संचालिता। तत्र शंकराचार्यतः वल्लभाचार्य पर्यन्तं स्वकीयमतं स्थापितम्। वल्लभाचार्यस्य सम्प्रदायस्य नाम शुद्धाद्वैतसम्प्रदायः वर्तते। अस्य अपरनाम पुष्टिमार्गः अस्ति।पोषणं तदनुग्रहः इति भागवतोक्त्या स्वीक्रियते। वल्लभाचार्येण प्रस्थानचतुष्टयं स्वीकृतम्। अन्यैः आचार्यैः प्रस्थानत्रयं स्वीकृतम्।

प्रस्थीयते अनेन इति प्रस्थानम्। एन सर्वदा सर्वं परित्यज्य बुद्धौ ब्रह्मविषयकं ज्ञानं प्रकर्षेण स्थियते इदमेव साधनं प्रस्थानं कथ्यते। पुष्टिमार्गे प्रस्थानचतुष्टयं स्वीकृतम् इति। यथा –

वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव।
समाधि भाषा व्यासस्य प्रमाणं तच्चतुष्टयम्।।

**1.वेदाः –**

वेदः प्रथमम् प्रस्थानं वर्तते। तत्र ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदश्चेति। एतेषां वेदानां 1121 शाखाः अस्ति। तेषु ग्रन्थेषु यत् तत्वम् वर्तते तत् तत्वं प्रस्थानत्रयं निहितं वर्तते। यथोक्तं वल्लभाचार्येण –

यज्ञरूपो हरिः पूर्वकाण्डे ब्रह्मतनुः परेः।
सक्षात् वेदः परब्रह्मणः स्वरूपं विद्यते।।

**2.श्रीकृष्णवाक्यानि –**

श्रीमद् भगवतगीताकृष्णवाक्यानि अस्ति। अनेन कारणेन द्वितीयं प्रस्थानं श्रीमद्भगवतगीता वर्तते। यथोक्तं –

''एकं शास्त्रं देवकीपुत्रगीतम्।''[11]

**3.व्याससूत्राणि –**

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राप्याहुः मनीषिणः।।[12]

इदं ब्रह्मसूत्रे प्राप्यते। प्रथमा॰ध्याये स्वरूपबोधकानि वाक्यानि विचारर्यन्ते। तानि द्विविधानि – 1.संदिग्धानि 2.निःसंदिग्धानि। तत्र निसंदिग्धानां निर्णयो न वक्तव्यः।

एवं प्रकारेण वाक्यानां विचारः क्रियते। तत्र संदिग्धानि चतुर्विधानि सन्ति। तद्यथा –

1. कार्यप्रतिपादकानि।
2. अन्तर्यामिप्रतिपादकानि।
3. उपास्यरूपप्रतिपादकानि।
4. प्रकीर्णानि।

प्रथमपादः समन्वय अध्यायः।

ततो द्वितीये पादे वेद वाधकत्वान्भावे॰पि तैः अपि स्वातन्त्रयेण कश्चन पुरुषार्थः सेत्यस्यतीत्याशङ्क्य ब्राह्मावाह्भ्यतानि एकीकृत निराकरोति। भ्रान्तः तुल्यत्वात्।

तृतीयेऽध्याये उपनिषदविचारः वर्तते।

चतुर्थेऽध्याये यस्यनाम फलाध्याय वर्तते। तत्र विचारयते–

जीवतः म्रियमाणस्य गच्छतः सफलस्य च अतो ब्रह्मविदा कार्यमेव न चान्यथा।

एवं प्रकारेण व्याससूत्राणि विवेचितानि। तत्र च शब्देन इदं लिखितम्।

चकरात् जैमिनि सूत्राणि च। एवकारोम् व्याससूत्र–अविरोधेनैव तद॑ीकरणात। हि युक्तश्चायमर्थः उपजीव्यत्वात्।

**समाधिभाषा व्यासस्य –**

अत्र वल्लभाचार्येण महर्षिव्यासस्य भाषा त्रिविधा स्वीकृता। भाषास्तु त्रिविधा प्रोक्ता । यथा –

एषा समाधिभाषा हि व्यासस्यामित तेजसः।
लौकिकी चान्यभाषा च समाधेः पौषिके तु ते।।
ते प्रमाणमभिप्रयात् सर्वथा पूर्ववन्नाहे।
न तद्विरोधो दोषाय ते वक्ष्ये·वसरे स्वके।। [13]

समाधापुपलभ्य यावानर्थो निरूपितः सा समाधिभाषा। तद्विरुद्धोर्थो यत्र सा मतान्तरभाषा लोकसिद्धा तु लौकिकी।

एवं प्रकारेण वल्लभाचार्येण प्रस्थानचतुष्टयं स्वीकृतम्। अस्मिन् सम्प्रदाये अनेकानि वैशिष्ट्यानि सन्ति।

# सन्दर्भ–सूची


**1.** पदमपुराण

2. भक्तमाल–छन्द–48

3. शुद्वौद्वैतमार्तण्डः–27/28

**4.** ब्र.सू. 3/2/27पर अणु

**5.** सुबोधिनी–तृ.स्कन्ध

**6.** ब्र.सू. अणु–3/3/33

7. ब्र.सू. 3/2/5 पर अणुभा.

8. विद्वन्मण्डन – पृ.–7

**9.** अणु –4/4/9

10. शुद्धौद्वैत मार्तण्डे – पृ.–55

**11.** शा.प्र.

**12.** ब्र.सूत्र

13. भा.नि.19/2/92